# Smaragaurisha Stava

# સ્મરગૌરીશસ્તવઃ

## Document Information

Text title : Smaragaurisha Stava

File name : smaragaurIshastavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 48 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# સ્મરગૌરીશસ્તવઃ

(૪૮)

ૐ શ્રીગણેશાય નમઃ ।

ભગવત્પાદયતીશ્વરમમલં પરશિવલીલાકલિતશરીરમ્ ।
પરમતભેદનિરાસનચતુરં પરમં ગુરુવરમાશ્રય ઇહ તમ્ ॥ ૧॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥ ધ્રુવપદમ્ ॥

યસ્માદેતદ્ વિશ્વમશેષં સમભૂદ્ યેન સમન્વિતમન્તે ।
લયમપિ ગચ્છેત્ પરમાનન્દે પરશિવરૂપપરાત્પરતત્ત્વે ॥ ૨॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

માયાશક્તિઃ સમજનિ યસ્માત્ ત્રિગુણવ્યક્તિં સૃજતે કાર્યમ્ ।
યદનુ ક્રમતઃ સકલં જનિતં પરશિવરૂપે પરમાધારે ॥ ૩॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

યન્મુખચરણૌ હરિધાતારૌ દ્રષ્ટું યાતૌ તિર્યગ્ભાવમ્ ।
દિવિ ભુવિ નેશૌ સમભૂતાં તૌ પરમં દૈવં નાસ્તિ યતોઽન્યત્ ॥ ૪॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

યત્પ્રાપ્ત્યર્થં કર્મ સમસ્તં નાલં યોગઃ સાઙ્ખ્યમતં વા ।
ભક્તિગ્રાહ્યં પરમાનન્દં ભવરોગૈકનિવારણચતુરમ્ ॥ ૫॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

લિઙ્ગે વાર્ચાં કુરુતે મર્ત્યો યસ્ય પરસ્ય પ્રતિપત્ત્યર્થમ્ ।
તસ્ય સમીપં વાપ્યથ ગન્તું બિભ્યતિ દૂતાઃ શમનસ્યાપિ ॥ ૬॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

યસ્માદ્ ભીત્યોદેતિ વિવસ્વાન્ વાતો વાત્યપિ ભીત્યા યસ્માત્ ।
સર્વં શાસ્તિ યદન્તસ્તિષ્ઠન્નન્તર્યામિશ્રુતિકથિતો યઃ ॥ ૭॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

વર્ણાશ્રમિકૃતકર્મ સમસ્તં યત્પ્રીત્યર્થં ક્રિયતે ચેત્ તત્ ।
સમ્યગ્ ભવતીત્યુક્તમતોઽન્યઃ કો વા દેવો ભવતીશાનાત્ ॥ ૮॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

યો વૈ રુદ્રો ભગવાનિતિ યં શ્રુતિરપિ સાધ્વી સકલાત્માનમ્ ।
પ્રાહ પરેશો મોક્ષદ ઇતિ ચ સ્વાહાવચનાદાથર્વણગાત્ ॥ ૯॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

શતરુદ્રીયં જપતાં વિદુષાં સર્વક્લેશવિનાશનમૂચે ।
યદનુગ્રહતઃ સર્વનરાણાં ભુક્તિર્મુક્તિર્ભવત ઇહેતિ ॥ ૧૦॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

શિવ શઙ્કર હર ભક્તશરણ્યેત્યનિશં પઠતાં નતિનુતિસમયે ।
પાપવિનાશં કુરુતે ભગવાન્ પરશિવભાવપ્રકટનમપિ ચ ॥ ૧૧॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

શ્રીમદ્વ્યાઘ્રપુરસ્થિતમમલં ચિત્સુખનટનવિરાજિતચરણમ્ ।
દેવમુનીશ્વરસેવિતવિભવં ચિન્તકસજ્જનભાવિતસુષમમ્ ॥ ૧૨॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

વેદાન્તેષુ યમાહુરજસ્રં વિશ્વાધિક ઇતિ સર્વમુનીન્દ્રાઃ ।
મૂર્ત્યષ્ટકવપુષં કથયન્તે કેચિત્ સુધિયઃ સકલાત્માનમ્ ॥ ૧૩॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

વિજયી ભવ હે પરમેશ્વર ભો વિશ્વોત્તીર્ણ વિભો પરમાત્મન્ ।
મમ હૃદિ ભાસિત મઙ્ગલમૂર્તે" કુરુ તવ ચિન્તારસિકં હૃદયમ્ ॥ ૧૪॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

ગુણવૈતૃષ્ણ્યં પરવૈરાગ્યં ગુણચિન્તાનાં યમનિષ્ઠાનામ્ ।
યત્કૃપયાત્મશિવૈક્યપરાણાં ન ભવેજ્જનનીજઠરે વાસઃ ॥ ૧૫॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

કણભુગ્વાદપરિશ્રમતો વા જૈમિનિતન્ત્રકૃતશ્રમતો વા ।
ન ભવતિ જન્મશતેષ્વપિ મુક્તિઃ શિવચરણં ભજ મુક્તિનિદાનમ્ ॥ ૧૬॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

નિત્યં શુદ્ધં બુદ્ધં મુક્તં ત્વક્ષરમનુભવગમ્યં પૂર્ણમ્ ।
યં શિવમેકં પશ્યન્તોઽમી સઙ્ગચ્છન્તે કૃતકૃત્યત્વમ્ ॥ ૧૭॥

સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

ઇન્દ્રં વિષ્ણું બ્રહ્માણં વા ધ્યાયન્તસ્તે યત્કૃપયૈવ ।
ક્રમતોઽવાપ્ય સદાશિવભાવં પરમોદારાઃ સ્યુર્ભયહીનાઃ ॥ ૧૮॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

સામાન્યાત્મતયા હિ સમસ્તં પ્રવિલાપ્યૈતત્ સ્વપ્નસદૃક્ષમ્ ।
યં પશ્યન્તિ જ્ઞાનસમાધૌ શિવમદ્વૈતં પ્રત્યક્પ્રવણાઃ ॥ ૧૯॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

જીવન્મુક્તતયા કૃતકૃત્યા અપિ વિદ્વાંસઃ પરમેશસ્ય ।
પ્રારબ્ધક્ષયપર્યન્તં તે ભક્તિં કુર્વન્તીતિ હિ શિષ્ટાઃ ॥ ૨૦॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

અન્વહમેતત્ પરશિવભજનં બુધરમણીયં ભવતીત્યાહુઃ ।
શ્રુતયઃ સ્મૃતયઃ સુધિયો લોકે કલિતરણાદિસમસ્તપુમર્થમ્ ॥ ૨૧॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

કાશીપુરવરવાસપરાણાં કલિકલ્મષહરતીર્થરતાનામ્ ।
પ્રદિશતિ ભગવાનન્તિમસમયે ભવભયતારકતારકબોધમ્ ॥ ૨૨॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

સવિતુર્દેવસ્યાન્તર્હૃદયે તિષ્ઠન્ ભર્ગો બુદ્ધિં નોઽસૌ ।
ઈષ્ટે સોઽક્ષિણ્યેકતયોક્તો ગાયત્ર્યાખ્યચ્છન્દોવચસામ્ ॥ ૨૩॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

ન શિવાદધિકં શ્રુતિશાસનતો ન શિવાદધિકં સ્મૃતિશાસનતઃ ।
ન શિવાદધિકં મુનિશાસનતો ન શિવાધિકં ગુરુશાસનતઃ ॥ ૨૪॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

ભજગોવિન્દસ્તુતિરિહ કથિતા ભગવત્પાદયતીશ્વરગુરુભિઃ ।
તત્કૃપયૈવ શિવસ્તવનં મે કૃતમિતિ સન્તઃ કરુણાં કુર્યુઃ ॥ ૨૫॥
સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥

સોમકલાધરશમ્ભોરેતત્ સ્તોત્રં યઃ પઠતીહ મનુષ્યઃ ।
સ હિ ભુવિ ધન્યઃ સ હિ ભુવિ માન્યઃ સ હિ ભુવિ ભક્તઃ સ હિ ભુવિ મુક્તઃ ॥

સ્મર ગૌરીશં સ્મર ગૌરીશં સ્મર ગૌરીશં પાપમતે ॥ ૨૬॥

ઇતિ શ્રીસ્મરગૌરીશસ્તવઃ સમ્પૂર્ણઃ ।
ભજગૌરીશસ્તુતિઃ

This stotra is on the model of the Bhajagovindam
(also known as mohamudgara) of Shankaracharya,
as is expressly stated in the last but one
verse of this stotra.
It also resembles the updeshashikhAmaNi of
Tyagaraja, disciple of AnandanAtha.

Proofread by Sivakumar Thyagarajan Iyer

---

*Smaragaurisha Stava*
pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*